

एककम् - ४

# महताम् एकरूपता ।

लोकाः समस्ताः सुखिनो भवन्तु इति हि अस्माकं प्रार्थना। सर्वान् समभावनया द्रष्टुं वयं शक्ताः भवेम। तत्समर्थकः सम्भाषणांशः, गानम्, श्रीचट्टम्पिस्वामिनः जीवनचरितात् उद्धृता कापि घटना च एकके अस्मिन् आयोजितम्।

# १.अरक्षितं तिष्ठति दैवरक्षितम्।

मनुः पितरौ च विनोदयात्रार्थं प्रस्थिताः। ते मध्येमार्गं भोजनार्थं वृक्षच्छायायाम् उपाविशन्। तदा द्वादशवर्षीयः कश्चन बालः तान् उपेत्य अवदत् -

बालः - मातः! भोजनं देहि।

माता - अरे, कस्त्वम्?

(बालः*रोदिति*)

कुतः आगच्छसि?

बालः - याननिस्थानात्। मम गृहं नास्ति।

माता - मनो! अस्मै पाथेयं किञ्चिद् यच्छ।

(*मनुः पाथेयं यच्छति। बालः लौल्येन खादति। सर्वे तमेव अवलोकयन्ति*)

मनुः - पितः! पश्य तस्य युतकं विशीर्णम्। मम युतकेषु अन्यतमम्.....

पिता - उत्तमम्। दीयतां , शुद्धं वस्त्रं दीयताम्।

(मनुः *युतकमेकं तस्मै ददाति*। बालः *युतकं गृहीत्वा अश्रूणि मुञ्चति।*)

माता - (*तं समाश्वासयति*) पुत्र! मा रुद, मा रुद।

पिता - त्वम् अस्माभिः साकम् आगच्छसि वा?

(बालः *मौनमवलम्बते*)

आगच्छ। समीपस्थबालसंरक्षणभवने त्वां प्रवेशयामि। तत्र भक्षणं विद्याभ्यासं च लप्स्यसे।

**पठनप्रवर्तनानि।**

पश्चात् किम् अभवत् इति संभाव्य खण्डिकामेकां लिखतु।

**श्रद्धेयाः अंशाः।**

- भावना।
- आशयव्यक्तता।
- वाक्यघटना।




विनोदयात्रासङ्घे के के सन्ति? ते कुत्र गच्छन्ति? मनोः सोदरी किं करोति? चित्रं निरीक्ष्य लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- वाक्यघटना।

# अनुबन्धः।

## शब्दकोशः।

| | | | |
|---|---|---|---|
| अश्रूणि | बाष्पाणि | കണ്ണുനീർ | tears |
| उपाविशन् | उपविशन्ति स्म | ഇരുന്നു | sat down |
| उपेत्य | समीपं गत्वा | അടുത്തുചെന്നിട്ട് | having approached |
| कुतः | कस्मात् देशात् | എവിടെനിന്ന് | from which place |
| खादति | भुङ्क्ते | തിന്നുന്നു | eats |
| छाया | प्रतिबिम्बम् | നിഴൽ | shadow |
| दैवं | भाग्यं | ഭാഗ്യം | luck |
| पाथेयम् | पथि साधु | പൊതിച്ചോറ് | food packet |
| प्रस्थिताः | प्रस्थानं कृताः | പുറപ്പെട്ടവർ | those who started |
| मध्येमार्गम् | मार्गमध्ये | വഴിയിൽ | midway |
| मौनमवलम्बते | तूष्णीम् आस्ते | മിണ്ടാതെ നിൽക്കുന്നു | keeps silence |
| लौल्येन | लोलुपतया | ആർത്തിയോടെ | greedily |
| विशीर्णम् | जीर्णम् | കീറിയത് | torn |
| समाश्वासयति | सान्त्वयति | ആശ്വസിപ്പിക്കുന്നു | pacifies/consoles |

## पदच्छेदः।

| | | |
|---|---|---|
| इत्येव | - | इति + एव। |
| कस्त्वम् | - | कः + त्वम्। |
| तमेव | - | तम् + एव। |
| युतकमेकम् | - | युतकम् + एकम्। |
| मौनमवलम्बते | - | मौनम् + अवलम्बते। |

**विग्रहाः।**

| | | |
|---|---|---|
| अरक्षितम् | - | न रक्षितम्। |
| दैवरक्षितम् | - | दैवेन रक्षितम्। |
| पाथेयम् | - | पथि साधु। |

**शब्दरूपावलिः।**

**दकारान्तः अस्मद् शब्दः त्रिषु लिङ्गेषु समानः।**

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु। |

**ऋकारान्तः पुल्लिङ्गः पितृशब्दः।**

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| सं.प्रथमा | हे पितः | हे पितरौ | हे पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्यां | पितृभिः |

| | | | |
|---|---|---|---|
| चतुर्थी | पित्रे | पितृभ्यां | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्यां | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितृणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु। |

**धातुरूपावलिः।**

**ददाति - डु दाञ् दाने (लट्.) प. प. प्र. पु. ए. व.।**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र.पु. | ददाति | दत्तः | ददति |
| म.पु. | ददासि | दत्थः | दत्थ |
| उ.पु. | ददामि | दद्वः | दद्मः। |

**लप्स्यसे - लभष् प्राप्तौ (लृट्.) आ. प. म. पु. ए. व.।**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र.पु. | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| म.पु. | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उ.पु. | लप्स्ये | लप्स्यावहे | लप्स्यामहे। |

*





# १०.स्नेहगीतम्।

स्नेहगीतमालपन्तु शोभनं शुभावहं
स्नेह एव कारणं प्रपञ्चसुस्थितेस्स्थिरम्।
एकरागमेकतालमालपन्तु गीतकं
द्वेषभावमाशु सन्त्यजेम नाशकारणम्।।

अलसतां विहाय कर्मनिरतमस्तु जीवितं
सरसमेव कर्म कर्तुमुत्सुका भवेम च।
सञ्चरेम कर्मभूमिमेकभावसंयुताः
संवदेम लोकशान्तिगीतमाशु सन्ततम्।।

**आशयः** स्नेहात् उद्भूतं जगदिदं स्नेहरसं पीत्वैव वर्धते। स्नेहगीतमेव आलपनीयम्। द्वेषं त्यक्त्वा सर्वेऽपि स्नेहमयानि गीतानि आलपन्तु। द्वेषः नाशकारणं भवति। अलसतां परित्यज्य वयं कर्मसु व्यापृताः भवेम। स्कन्धे स्कन्धं संस्थाप्य कर्मभूमिं गच्छामः। स्नेहगीतं गायेम च।

## पठनप्रवर्तनानि।


गानं तालानुसारम् आलपतु।

**श्रद्धेयाः अंशाः।**

- उचिततालस्वीकारः।
- उच्चारणस्पष्टता।



कवितां पठतु। अधोरेखाङ्कितानां पदानां स्थाने उचितानि पदानि स्वीकृत्य गानं विपुलीकरोतु।

भारतं भारतं जयतु भारतं
भारतं भारतं लसतु भारतम्।
शान्तिसंयुतं कान्तिसंयुतं
शान्तिकान्तिसंयुतं जयतु भारतम्।

**पदच्छेदः।**

| | | |
|---|---|---|
| प्रपञ्चसुस्थितेस्स्थिरम् | - | प्रपञ्चसुस्थितेः + स्थिरम् |
| सरसमेव | - | सरसम् + एव |
| स्नेह एव | - | स्नेहः + एव |
| स्नेहगीतमालपन्तु | - | स्नेहगीतम् + आलपन्तु |
| कर्तुमुत्सुकाः | - | कर्तुम् + उत्सुकाः |
| एकरागमेकतालमालपन्तु | - | एकरागम् + एकतालम् + आलपन्तु |
| द्वेषभावमाशु | - | द्वेषभावम् + आशु |
| लोकशान्तिगीतमाशु | - | लोकशान्तिगीतम् + आशु |
| कर्मभूमिमेकभावसंयुता | - | कर्मभूमिम् + एकभावसंयुता |

## अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| स्थिरम् | अचलम् | എക്കാലവും | for ever |
| गीतकम् | गीतम् | പാട്ട് | song |
| आशु | क्षिप्रम् | പെട്ടെന്ന് | suddenly |
| विहाय | त्यक्त्वा | ഉപേക്ഷിച്ചിട്ട് | having given up |
| निरतः | व्यापृतः | മുഴുകിയവൻ | engaged |
| निरन्तरम् | अनिशम् | തുടർച്ചയായി | continuously |

✱

# ११.अतिथिदेवो भव।



परमभट्टारकश्रीविद्याधिराजचट्टम्पिस्वामी इति विख्यातः कश्चन यतिवर्यः आसीत्। अहिंसाव्रतम् आचरतः तस्य वासस्थाने जन्मना वैरिणः जन्तवः अपि स्नेहेन अवसन्। तस्य जीवने कामपि घटनां पश्यतु -

एकत्र कश्चन धनिकः आसीत्। उदारम्मन्यः सःकदाचित् स्वामिनं भोजनाय गृहं न्यमन्त्रयत्। तदा स्वामी एवम् अवदत् - "मया समं मम अनुचराः च भविष्यन्ति। तेभ्योऽपि मिष्टान्नं दातव्यम्"। धनिकः तत् अङ्गीकरोति स्म। निर्दिष्टे समये एव स्वामी भोजनाय समागतः। धनिकः अवदत् - "आगच्छतु, भोजनार्थम् उपविशतु। भवतः अनुचराः कुत्र?" इति। "भोजनं परिवेषयतु ।अहं तान् आह्वयामि" इत्युक्त्वा स्वामी अङ्गुलीचोटनम् अकरोत्। तदा बहवः शुनकाः आगत्य विना कोलाहलं भोक्तुम् आरभन्त। अद्भुतस्तब्धं धनिकम् अवलोक्य स्वामी अवदत् "कोऽत्र अद्भुतस्य विषयः? अहं यत्र भवामि तत्र एतेऽपि भविष्यन्ति।" तदाकर्ण्य धनिकः लज्जितः अभवत्।



**पठनप्रवर्तनानि।**

अधो दत्तां खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखतु।

चट्टम्पिस्वामी अनन्तपुर्यां कण्णम्मूला समीपस्थे कोल्लूर् ग्रामे उल्लूर्कोट् भवने १८५३ (1853) तमे आगस्ट् मासस्य पञ्चविंशे दिने जन्म अलभत। अस्य माता नङ्ङेमप्पिल्ला, पिता वासुदेवशर्मा च आसीत्। अनेन महाभागेन कैरल्याम् अनेके ग्रन्थाः विरचिताः। अद्वैतचिन्तापद्धतिः,वेदाधिकारनिरूपणम्, जीवकारुण्यनिरूपणम्, प्राचीनमलयालम् इत्यादयः तेन विरचिताः केचन ग्रन्थाः। १९२४ (1924) तमे वर्षे मेय् मासस्य पञ्चमदिने कोल्लम् जिल्लायां पन्मना ग्रामे सः समाधिं प्राप।

1. चट्टम्पिस्वामी कुत्र जनिमलभत?
2. तस्य भवनस्य नाम किम्?
3. तस्य पितरौ कौ आस्ताम्?
4. कस्यां भाषायाम् अनेन अधिकतमाः ग्रन्थाः विरचिताः?
5. सः कदा कस्मिन् ग्रामे समाधिं प्राप?

चट्टम्पिस्वामिनः सहजीविस्नेहः अवगतः किल। एवं युष्माकं प्रदेशे सहजीविषु बहु स्निह्यन्तं कश्चित् पश्येत् चेत् किं किं पृच्छेत्? तदर्थं प्रश्नावलिं रचयतु।

**श्रद्धेयाः अंशाः।**

- विषयबन्धिता।
- आशयव्यक्तता।
- प्रश्नवाचकशब्दानाम् उचितोपयोगिता।

मञ्जूषायां दत्तानां पदानाम् उचितरूपाणि उपयुज्य खण्डिकां लिखतु।

अहं ........... (माता) सह देवालयं गच्छामि। ततः गृहं गत्वा ........... (पिता) समं प्रातरशनं करोमि। ततः सार्धनववादने ........... (मातुलपुत्रः) साकं विद्यालयं गच्छामि। तत्र चतुर्वादनपर्यन्तं पठामि। अनन्तरं सायाह्ने ........... (मित्राणि) सह क्रीडाङ्कणे क्रीडामि।

# अनुबन्धः।

## शब्दकोशः।

| | | | |
|---|---|---|---|
| विख्यातः | प्रसिद्धः | പ്രസിദ്ധൻ | well known |
| उदारम्मन्यः | आत्मानम् उदारं-यः मन्यते सः। | ഉദാരശീലനെന്ന് സ്വയം-ഭാവിക്കുന്നവൻ | one who pretends to be generous |
| यतिवर्यः | सन्यासिवर्यः | സന്യാസിശ്രേഷ്ഠൻ | noble saint/great sage |
| वासस्थानम् | वासस्थलं | വാസസ്ഥലം | residence |
| वैरिणः | शत्रवः | ശത്രുക്കൾ | enemies |
| द्योतकम् | प्रकाशकम् | പ്രകാശിപ്പിക്കുന്ന | brightening/enlightening |
| घटना | आख्यानम्/सम्भवः | സംഭവം | incident |
| न्यमन्त्रयत् | निमन्त्रयति स्म | ക്ഷണിച്ചു | invited |
| साकम् | सह | കൂടെ | along with |
| अनुचराः | अनुयायिनः | അനുയായികൾ | followers/desciples |
| मिष्टान्नम् | समृद्धभोजनम् | വിഭവസമൃദ്ധമായ ഭക്ഷണം | feast |
| समागतः | आगतः | വന്നു ചേർന്നവൻ | comer |
| परिवेषयतु | भोजनं वितरतु | വിളമ്പുക | serve |
| आह्वयामि | आह्वानं करोमि | ഞാൻ വിളിക്കുന്നു | (I do) invite |
| अङ्गुलीचोटनम् | अङ्गुल्या निमन्त्रणम् | വിരൽഞൊടിക്കൽ | inviting by making noise with fingers |
| शुनकाः | कुक्कुराः | നായ്ക്കൾ | dogs |
| अद्भुतस्तब्धः | आश्चर्यचकितः | അത്ഭുതസ്തബ്ധനായി | wonderstruck |

## पदच्छेदः।

तेभ्योऽपि - तेभ्यः + अपि।

इत्युक्त्वा - इति + उक्त्वा।

एतेऽपि - एते + अपि।

## विग्रहाः।

विख्यातः - विशेषेण ख्यातः।

अतिथिः - न विद्यते तिथिः यस्य सः।

## शब्दरूपावलिः।

### दकारान्तः पुल्लिङ्गः एतद् शब्दः।

| | | | |
|---|---|---|---|
| प्र. | एषः | एतौ | एते |
| द्वि. | एतम्/एनम् | एतौ/एनौ | एतान्/एनान् |
| तृ. | एतेन/एनेन | एताभ्यां | एतैः |

| | | | |
|---|---|---|---|
| च. | एतस्मै | एताभ्यां | एतेभ्यः |
| प. | एतस्मात् | एताभ्यां | एतेभ्यः |
| ष. | एतस्य | एतयोः/एनयोः | एतेषाम् |
| स. | एतस्मिन् | एतयोः/एनयोः | एतेषु। |

**प्रयोगविशेषः।**

मया समम् - सहार्थकशब्दयोगे तृतीया।

अध्यापकः शिष्यैःसमं वार्तालापं करोति।

## किमार्जितम् ?

**निर्देशाः**

अधः प्रदत्तानि प्रवर्तनानि समुचितया रीत्या कृतानि चेत् चित्रपतगस्य , भागिकतया कृतानि चेत् पाटलस्य  च चित्राणि यथास्थाने वर्णैः विरच्यन्ताम्।

1. खण्डिकां सम्भाव्य लिखितम् -
2. चित्रं दृष्ट्वा प्रश्नानाम् उत्तराणि लिखितानि -
3. गानं तालानुसारम् आलपितम् -
4. खण्डिकां पठित्वा उत्तराणि लिखितानि -
5. अभिमुखार्थं प्रश्नावलिः रचिता -

✱